"तस्य चान्येऽपि दिङ्नागा बभुवुरनुयायिनः ।
अञ्जनो वामनश्चैव महापद्मश्च सुप्रभः ॥" )
क्ली, लक्षकोटिसंख्या ॥ इति लीलावती ॥ (यथा, महाभारते । २ । ६९ । ३ ।
"अयुतं प्रयुतं चैव पद्मं खर्व्वमथार्व्वुदम् ।
शङ्कश्चैव महापद्मं निखर्व्वं कोटिरेव च ॥" )
शुक्लपद्मम् । इति रत्नमाला ॥

**महापातकं**, क्ली, ( महदतिशयितं पातकम् । ) पापविशेषः । तत्तु पञ्चविधम् । यथा,—
"ब्रह्महत्या सुरापानं स्तेयं गुर्व्वङ्गनागमः ।
महान्ति पातकान्याहुः संसर्गश्चापि तैः सह ॥"
इति मानवे ११ अध्यायः ॥
"महापातकजं चिह्नं सप्तजन्मसु जायते ।
बाधते व्याधिरूपेण तस्य कृच्छ्रादिभिः समः ॥"
इति शातातपीयकर्म्मविपाकः ॥
"तुलामकरमेषेषु प्रातःस्नानं विधीयते ।
हविष्यं ब्रह्मचर्य्यञ्च महापातकनाशनम् ॥"
इति मलमासतत्त्वम् ॥
"कृष्णेति मङ्गलं नाम यस्य वाचि प्रवर्त्तते ।
भस्मीभवन्ति राजेन्द्र ! महापातककोटयः ॥"
इति पुराणम् ॥

**महापातकी**, [ न् ] त्रि, ( महापातकमस्त्यस्येति । महापातक+इनिः । ) पञ्चप्रकारमहापातकयुक्तः । स च पतितः । यथा,—
"महापातकिनो ये च पतितास्ते प्रकीर्त्तिताः ।
पतितानां न दाहः स्यान्नान्त्येष्टिर्नास्थिसञ्चयः ॥
न चाश्रुपातः पिण्डो वा कार्य्यं श्राद्धादिकं क्वचित् ।
एतानि पतितानान्तु यः करोति विमोहितः ॥
तप्तकृच्छ्रद्वयेनैव तस्य शुद्धिर्न चान्यथा ॥"
इति शुद्धितत्त्वधृतविष्णुपुराणवचनम् ॥
पारिभाषिकमहापातकी यथा,—
"कृतप्राणप्रतिष्ठाञ्च नीचेर्यो प्रतिमां द्विज ! ।
दुर्गां न प्रणमेद्यस्तु स महापातकी स्मृतः ॥"
इति देवीपुराणे व्यासनारदसंवादः ॥
अपि च ।
"पितरं मातरं भार्य्यां गुरुपत्नीं गुरुं परम् ।
यो न पुष्णाति कापट्यात् स महापातकी शिव ! ॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे ४४ अध्यायः ॥
( यथा च महानिर्व्वाणतन्त्रे । ३ । ८२ ।
"जातिभेदो न कर्त्तव्यः प्रसादे परमात्मनः ।
योऽशुद्धबुद्धिं कुरुते स महापातकी भवेत् ॥")

**महापापं**, क्ली, ( महच्च तत् पापञ्चेति । ) महापातकम् । यथा,—
"महापापेषु सर्व्वं स्यात् तदर्द्धमुपपातके ।
दद्यात् पापेषु षष्ठांशं ज्ञात्वा व्याधिबलाबलम् ॥"
इति मलमासतत्त्वम् ॥

**महापारेवतं**, क्ली, ( महच्च तत् पारेवतञ्चेति । ) फलवृक्षविशेषः । बड़ा पारेवत इति हिन्दी भाषा ॥ तत्पर्य्यायः । स्वर्णपारेवतम् २ साम्राजिनम् ३ खारिकम् ४ रक्तरैवतकम् ५ बृहत्पारेवतम् ६ द्वीपजम् ७ द्वीपखर्ज्जूरम् ८ । अस्य गुणाः । मधुरत्वम् । बलकारित्वम् । पुष्टिवर्द्धनत्वम् । वृष्यत्वम् । मूर्च्छाभ्रमघ्नत्वम् । पारेवतादधिकगुणत्वञ्च । इति राजनिर्घण्टः ॥

**महापाशः**, पुं, ( महान् पाशोऽस्य । ) यमदूतविशेषः । इति वृहद्धर्म्मपुराणे ५६ अध्यायः ॥ ( महांश्चासौ पाशश्चेति । ) बृहत्पाशश्च ॥

**महापाषकः**, पुं, ( पषति बाधते निराकरोति परकालेश्वरादिकमिति । पष्+ण्वुल् । ततः महांश्चासौ पाषकश्चेति । ) बुद्धभिक्षुकः । तत्पर्य्यायः । चेलुकः २ श्रामणेरः ३ प्रव्रजितः ४ गोमीनः ५ । इति त्रिकाण्डशेषः ॥ ( महोपाषक इति पाठः क्वचित् दृश्यते ॥ )

**महापिण्डीतकः**, पुं, (पिण्डीं तनोतीति । तन्+डः संज्ञार्थे कन् । ततः महांश्चासौ पिण्डीतकश्चेति । पिण्डाकारफलत्वादस्य तथात्वम् । ) कृष्णवर्णमहामदनवृक्षः । तत्पर्य्यायः । वाराहः २ । अस्य गुणाः । श्रेष्ठत्वम् । कटुतिक्तरसान्वितत्वम् । छर्द्दनत्वम् । कफहृद्रोगपक्वामाशयशोधनत्वञ्च । इति राजनिर्घण्टः ॥

**महापिण्डीतरुः**, पुं, ( महांश्चासौ पिण्डीतरुश्चेति । ) वृक्षविशेषः । पेड़िरा इति हिन्दी भाषा । तत्पर्य्यायः । श्वेतपिण्डीतकः २ करहाटः ३ क्षुरः ४ शल्ककोषतरुः ५ शरः ६ पिण्डीतरुः ७ । अस्य गुणाः । कषायत्वम् । उष्णत्वम् । त्रिदोषशमनत्वम् । चर्म्मरोगापहत्वम् । विशेषात् रक्तदोषनाशित्वञ्च । इति राजनिर्घण्टः ॥

**महापीलुः**, पुं, (पीलति प्रतिष्टभते विषपित्तादिकमिति । पील+"मृगय्वादयश्च ।" उणा० १।३८। इति कुः । ततो महान् पीलुरिति कर्म्मधारयः ।) पीलुवृक्षविशेषः । तत्पर्य्यायः । बृहत्पीलुः २ महाफलः ३ राजपीलुः ४ महावृक्षः ५ मधुपीलुः ६ । अस्य फलगुणाः । मधुरत्वम् । वृष्यत्वम् । विषनाशित्वम् । पित्तप्रशमनत्वम् । रुच्यत्वम् । आमघ्नत्वम् । दीपनीयकत्वञ्च । इति राजनिर्घण्टः ॥

**महापुराणं**, क्ली, ( महच्च तत् पुराणञ्चेति । ) एकादशलक्षणयुक्तव्यासप्रणीताष्टादशसंख्यकपुराणविशेषः । तस्य लक्षणं यथा,—
"सृष्टिश्चापि विसृष्टिश्च स्थितिस्तेषाञ्च पालनम् ।
कर्म्मणां वासना वार्त्ता मनूनाञ्च क्रमेण च ॥
वर्णनं प्रलयानाञ्च मोक्षस्य च निरूपणम् ।
उत्कीर्त्तनं हरेरेव देवानाञ्च पृथक् पृथक् ।
दशाधिकं लक्षणञ्च महतां परिकीर्त्तितम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १३२ अध्यायः ॥
( अष्टादशमहापुराणानां विशेषविवरणलक्षणादिकं पुराणशब्दे द्रष्टव्यम् ॥ )

**महापुरुषः**, पुं, ( महांश्चासौ पुरुषश्चेति । ) श्रेष्ठनरः । (यथा, श्रीमद्भागवते । ६ । १२ । २० ।
"भवानतार्षीन्मायां वै वैष्णवीं जनमोहिनीम् ।
यद्विहायासुरं भावं महापुरुषतां गतः ॥")
नारायणः । यथा,—
"ध्येयं सदा परिभवघ्नमभीष्टदोहं
तीर्थास्पदं शिवविरिञ्चिनुतं शरण्यम् ।
भृत्यार्त्तिहं प्रणतपालभवाब्धिपोतं
वन्दे महापुरुष ! ते चरणारविन्दम् ॥
त्यक्त्वा सुदुस्त्यजसुरेप्सितराज्यलक्ष्मीं
धर्म्मिष्ठ आर्य्यवचसा यदगादरण्यम् ।
मायामृगं दयितयेप्सितमन्वधाव-
वन्दे महापुरुष ! ते चरणारविन्दम् ॥"
इत्याह्निकतत्त्वधृतश्रीभागवतम् ॥

**महापुरुषदन्ता**, स्त्री, ( महापुरुषस्य दन्ता इव मूलानि यस्याः । ) शतमूली । इति रत्नमाला ॥ ( विवरणमस्याः शतमूलीशब्दे ज्ञातव्यम् ॥ )

**महापुरुषदन्तिका**, स्त्री, ( महापुरुषदन्ता+स्वार्थे कन् । स्त्रियां टाप् अत इत्वञ्च ।) महाशतावरी । इति राजनिर्घण्टः ॥

**महापुष्पा**, स्त्री, ( महत् प्रशस्तं पुष्पमस्याः । स्त्रियां टाप् । ) अपराजिता । इति शब्दचन्द्रिका ॥ ( यथा, सुश्रुते उत्तरतन्त्रे ५४ अध्याये ।
"दर्भपुष्पा महापुष्पा मशकाश्चिपिटास्तथाः ॥"
महापुष्पविशिष्टे, त्रि ॥ )

**महापृष्ठः**, पुं, ( महत् विपुलं पृष्ठमस्य । ) उष्ट्रः । इति राजनिर्घण्टः ॥ त्रि, बृहत्पृष्ठश्च ॥

**महाप्रकृतिः**, स्त्री, ( महती श्रेष्ठा प्रकृतिर्जगन्मूलकारणम् । ) दुर्गा । यथा,—
"चितिश्चैतन्यभावाद्वा चेतना वा चितिः स्मृता ।
महान् व्याप्य स्थिता सर्व्वं महा वा प्रकृतिर्म्मता ॥"
इति देवीपुराणे ४५ अध्यायः ॥

**महाप्रभः**, त्रि, महती प्रभा यस्येति । अतिशयदीप्तियुक्तः । ( यथा, हरिवंशे भविष्यपर्व्वणि । २८ । १९ ।
"ततश्चक्रं महाघोरं सहस्रारं महाप्रभम् ॥")

**महाप्रभा**, स्त्री, ( महती चासौ प्रभा चेति । ) महती दीप्तिः । यथा ; महाप्रभात्वावच्छिन्नाभावोऽन्धकारः । इति सामान्यलक्षणायां जगदीशः ॥

**महाप्रभुः**, पुं, ( महांश्चासौ प्रभुश्चेति । ) परमेश्वरः । यथा,—
"वन्देऽनन्ताद्भुतैश्वर्य्यं श्रीचैतन्यं महाप्रभुम् ।
नीचोऽपि यत्प्रसादात् स्यात् सदाचारप्रवर्त्तकः ॥"
इति हरिभक्तिविलासे ३ विलासः ॥
"अनन्तमद्भुतञ्चावितर्क्यं ऐश्वर्य्यं प्रभावो यस्य तं यतो महाप्रभुं परमेश्वरम् ।" इति तट्टीकायां जीवगोस्वामी ॥ श्रीचैतन्यः । यथा,—
"सोऽयं नीलगिरीश्वरः सविभवो यात्रा च सा गुण्डिचा